# मम पुस्तकम्

नाम - ____________________

पत्रसङ्केतः - ____________________

____________________

चलदूरवाणी-संख्या - ____________________

## वार्तालापाय

सहभागिभिः सह कृषिकर्म-विषये कृषिक्षेत्रविषये च चर्चां कुर्वन्तु । तान् पृच्छन्तु – १. अधः प्रदत्ते चित्रे कति शय्याः सन्ति ? २. चित्रे आहत्य कति जनाः दृश्यन्ते ? ३. कति जन्तवः सन्ति ? ४. कति वृक्षाः दृश्यन्ते ?





# ४ अस्माकं परिवेशः

**वयं ज्ञास्यामः**

| ए | ऐ | क | ज | भ | ड | श | ष | अं | अँ |
|---|---|---|---|---|---|---|---|---|---|

- ५१ तः १०० पर्यन्तं संख्यानां परिचयम्।
- पठनं लेखनं च।
- समूहेषु गणना।
- १ तः ५० पर्यन्तं संख्यानां संकलनं व्यवकलनं च (समूहे)।
- ५१ तः १०० पर्यन्तं संख्यानां संकलनं व्यवकलनं च (समूहं विना)।

## ■ चित्रं दृष्ट्वा पठामः-

१

एकम्



कण्ठाभरणम्



कूपः



जन्तवः

**शिक्षक-निर्देशः** - शिक्षकः/शिक्षिका उपरि लिखितानां शब्दानां पठनार्थं सहयोगं कुर्यात्, शिक्षार्थिनः चित्रस्य आधारेण न केवलम् अनुमानम् अपि तु अवगतानां शब्दानाम् एवञ्च अक्षराणाम् अपि उपयोगं कुर्युः।



भारतम्



बिडालः



शशकः

६

षट्

## अक्षराणि पठन्तु लिखन्तु च -

# ए



एकदन्तः

एकदन्तः शिवस्य पुत्रः अस्ति ।



एकता

एकतायां शक्तिः अस्ति ।

## चित्रं दृष्ट्वा शब्दं लिखन्तु -

११

## अक्षराणि पठन्तु लिखन्तु च -

ऐ



ऐन्द्रजालिकः

ऐन्द्रजालिकः स्वमायां प्रदर्शयति ।



ऐरावतः

ऐरातवतः इन्द्रस्य वाहनम् अस्ति ।

ऐ

ऐ

**शिक्षक-निर्देशः -** शिक्षकः / शिक्षिका चित्रं दर्शयित्वा पठने सहभागिनां सहायतां कुर्यात्, ते अक्षराणां लेखनं कुर्युः एवञ्च चित्रं दृष्ट्वा तस्य नाम अपि लिखेयुः ।

## पठन्तु अक्षराणि लिखन्तु च-

ज



जम्बूफलम्

गणेशाय जम्बूफलं रोचते ।



जैसलमेर्-नगरम्

जैसलमेर्-नगरम् अतीव रमणीयं स्थानम् अस्ति ।

| | | | | | |
|---|---|---|---|---|---|
| जलम् | जगत् | जीवनम् | जननी | अजा | जलधिः |
| जयः | ध्वजः | व्यजनम् | जङ्गलम् | जनकः | जनपदः |

ज

ज

## ■ चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







**शिक्षक-निर्देशः -** शिक्षकः / शिक्षिका चित्रं दर्शयित्वा पठने सहभागिनां सहायतां कुर्यात्, ते अक्षराणां लेखनं कुर्युः एवञ्च चित्रं दृष्ट्वा तस्य नाम अपि लिखेयुः ।

## अक्षराणि पठन्तु लिखन्तु च -

भ



भानुः

भानुः उदेति ।



भल्लूकः

भल्लूकः जङ्गले निवसति ।



भवनम्

भवनं सुन्दरम् अस्ति ।

| | | | | | |
|---|---|---|---|---|---|
| भयम् | भगिनी | भाषा | भिषक् | भूमिः | भोजनम् |
| भ्रमरः | भृत्यः | भारः | गर्दभः | भिण्डीनकम् | नभः |
| भाषणम् | अनुभवः | भार्या | भीमः | सभापतिः | भ्रातृजाया |

भ

भ

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







## अक्षराणि पठन्तु लिखन्तु च -

ड



डमरुः

डमरुः डम् डम् करोति।



डोरकम्

भगिनी डोरकेन बन्धनं करोति।



दाडिमम्

दाडिमं रक्तस्य वर्धनं करोति।

| | | | | | |
|---|---|---|---|---|---|
| वडवानलः | मण्डूकः | सुधाखण्डः | दण्डः | अण्डम् | कुण्डलम् |
| अवकरकण्डोलः | षडाननः | डयनम् | डाकिनी | कण्डूतिः | खण्डनम् |
| मण्डपः | कमण्डलुः | चण्डिका | जडता | शुण्डः | मण्डलम् |

ड

ड

## ▪ चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







## अक्षराणि पठन्तु लिखन्तु च -

# श



शङ्खः

अर्जुनस्य शङ्खस्य नाम देवदत्तः अस्ति ।



शिशुः

शिशुः हसति ।



शाकानि

हरितानि शाकानि लाभाय भवन्ति ।

| | | | | | |
|---|---|---|---|---|---|
| शशः | शक्तिः | शर्करा | शब्दः | शास्त्रम् | शीतलम् |
| शयनम् | शकटम् | दश | शरीरम् | शृङ्खला | शिमला |
| शोभा | शेषः | प्रवेशः | प्रकाशः | अंशुमान् | दशरथः |

श

श

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -









## अक्षराणि पठन्तु लिखन्तु च -

**ष**



षट्कोणः

एषः षट्कोणः अस्ति।



महिषी

कृषकः महिषीं पालयति।



मम मातृभाषा संस्कृतम् अस्ति।

| | | | | | |
|---|---|---|---|---|---|
| षण्मुखः | भाषणम् | प्रदूषणम् | दोषी | विषयः | विशेषः |
| कष्टम् | स्पष्टम् | विष्णुः | संघर्षः | संतोषः | ग्रीष्मः |
| कषायः | वित्तकोषः | विषादः | वर्षा | पुरुषः | आभूषणम् |

ष

ष

## ■ चित्राणि पश्यन्तु शब्दान् लिखन्तु च -








## पश्यन्तु अवगच्छन्तु च -





संसारः

एषः अनुस्वारः अस्ति।



पुँलिङ्गम्

एषः अनुनासिकः अस्ति।

| | | | | | |
|---|---|---|---|---|---|
| संशयः | संवत्सरः | संन्यासी | संसर्गः | संहिता | हंसः |
| संक्षेपः | सँस्कर्ता | काँस्कान् | पुँस्कोकिलः | सय्यँन्ता | |

## वर्णान् लिखन्तु -

अं ............ ............ ............ ............ ।

कं ............ ............ ............ ............ ।

डं ............ ............ ............ ............ ।

भं ............ ............ ............ ............ ।

यँ ............ ............ ............ ............ ।

लँ ............ ............ ............ ............ ।

वँ ............ ............ ............ ............ ।

■ **भवतः/भवत्याः गृहं परितः कानि कानि वस्तूनि सन्ति ? ✓ इति निर्देशं करोतु –**



कदली-वृक्षः



उद्यानम्



रेल-स्थानकम्



शृगालः







पाठशाला

चिकित्सालयः





कृषिक्षेत्रम्

निर्झरः

## पठन्तु वार्तालापं च कुर्वन्तु -

### सुखोमाजरी-ग्रामस्य कथा

सुखोमाजरी इति कश्चन ग्रामः आसीत्। तस्य ग्रामस्य जङ्गलानि कर्तितानि आसन्। कूपेषु नलिकादिषु च जलं न आसीत्। नदीनां जलम् अपि प्रदूषितम् अभवत्। परन्तु १९७० तमे वर्षे सुखोमाजरी-ग्रामः परिवर्तितः अभवत्। सुखोमाजरीग्रामे ग्रामसभायाः निर्माणम् अभवत्। ग्रामसभा निर्णयं स्वीकरोति यत् सर्वप्रथमं जङ्गलानां सुरक्षा करणीया इति।



तत्र वर्षाजलस्य संग्रहणार्थं सेचनगर्तानां निर्माणम् अभवत्। सेचनगर्तं परितः वृक्षारोपणम् अपि अजायत। बालकाः अपि वृक्षारोपणे साहाय्यं कृतवन्तः। कार्यं कठिनम् आसीत्। परन्तु ग्रामवासिनः अत्यधिकं परिश्रमं कृतवन्तः। पञ्चसु वर्षेषु सुखोमाजरीग्रामः हरितः (वृक्षमयः) सुखमयः च अभवत्।

**शिक्षक-निर्देशः –** शिक्षकः/शिक्षिका उपरि दत्तां कथां पठित्वा सहभागिनः श्रावयेत्, एवमेव तान् अपि एकां कथां श्रावयितुं प्रेरयेत्। वृक्षाणां, जङ्गलानां जलसंग्रहणादीनां च आवश्यकतायाः विषये चर्चां कुर्यात्। पर्यावरणसंरक्षणविषये सहभागिभिः सह वार्तालापम् अपि कुर्यात्।

## ■ अध:प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु –

प्रश्नः१. स्वस्य / स्वस्याः ग्रामस्य नाम लिखन्तु।

प्रश्नः२. भवतः / भवत्याः गृहे उपयोगार्थं जलं कुतः - कुतः आयाति ?

| नलिका | नलकूपः | सरोवरः | नदी | कूपः | जलसङ्ग्राहिका | कूपीजलम् |
|---|---|---|---|---|---|---|

प्रश्नः३. भवन्तः / भवत्यः गृहे उपयोगार्थं जलं कस्मिन् पात्रे स्थापयन्ति ?

| कलशे | घटे | द्रोण्याम् | जलसङ्ग्राहिकायाम् | कूप्याम् | बृहत्कूप्याम् | जलाधान्याम् |
|---|---|---|---|---|---|---|

प्रश्नः४. किं भवतः / भवत्याः क्षेत्रे जलस्य समस्या अस्ति ? भवन्तः / भवत्यः एतस्याः समस्यायाः कानि कारणानि पश्यन्ति ? चर्चां कुर्वन्तु ?

**शिक्षक-निर्देशः** – शिक्षकः / शिक्षिका उपरि प्रदत्तेषु प्रश्नेषु चर्चां कुर्यात्, तेषां प्रश्नानाम् उत्तरलेखने सहभागिनां सहायतां च कुर्यात्। सहभागिनः मञ्जूषायां प्रदत्तानां शब्दानां सहायतां स्वीकर्तुं शक्नुवन्ति। शिक्षकः / शिक्षिका चतुर्थप्रश्ने विशेषरूपेण चर्चां कुर्यात्। स्वच्छजलस्य सेवनेन कः लाभः इत्यस्मिन् विषये अपि चर्चा आवश्यकी।

## ■ आगच्छन्तु चर्चां कुर्मः -


दिल्ली जल बोर्ड
दिल्ली सरकार
पानी का बिल
पानी
श्री उमेश शर्मा
33, किशन गंज, नई दिल्ली
11/07/2017 05/09/2017
154564 17/09/2017
भुगतान की अन्तिम तिथि
03/10/2017
15/SZ-9 A-A 2314 3/2007 DOMESTIC-A
38 (A) 53.20
26.60
4267 1231311420 MPL 15 6
OF (A) ABOVE 76.00
---- 05/09/2017 STOPPED 0.76
---- 10/07/2017 STOPPED 0.00
38 20/MONTH PROV. AVERAGE 0.00
(+) 193.00
* TOWARDS SEWER MAINTENANCE
ROUND 350.00
ROUND 18.00
368.00
04/07/2007
जल ही जीवन है बूंद बूंद कीमती है इसे बचाइए।

(देहल्याः कस्यचन गृहस्य जलस्य व्ययपत्रकम्)

## ■ उपरि प्रदत्तं व्ययपत्रकं (बिल) पश्यन्तु तत्र गोलं कृत्वा उत्तराणि वदन्तु –

प्रश्नः १ व्ययपत्रकस्य कान् भागान् दृष्ट्वा ज्ञानं भवति यत् एतत् जलस्य व्ययपत्रकम् अस्ति ?

प्रश्नः २. एतत् व्ययपत्रकं कस्य स्थानस्य अस्ति ?

प्रश्नः ३. इदं व्ययपत्रकं कस्य नाम्ना अस्ति ?

प्रश्नः ४. व्ययपत्रकस्य शुल्कदानस्य अन्तिमः दिनाङ्कः कः ?

प्रश्नः ५. जलस्य एतत् व्ययपत्रकं कतीनां दिनानाम् अस्ति ?

प्रश्नः ६. व्ययपत्रके जलसंरक्षणं कुत्र लिखितम् अस्ति ?

**शिक्षकनिर्देशः -** शिक्षकः / शिक्षिका पूर्वं व्ययपत्रकस्य विवरणं दद्यात्। प्रदत्तेषु प्रश्नेषु सहभागिभिः सह वार्तालापम् अपि कुर्यात्। तेषाम् उत्तररूपेण गोलकं च कारयेत्।

# भानोः माता

पुष्पाणां मालानिर्माणे भानुः स्वमातुः सहायतां कुर्वन् आसीत् । सः मात्रे एकैकं पुष्पं ददाति स्म पुष्पसङ्ख्यां च वदति स्म । १० पुष्पाणाम् एका माला अर्थात् प्रत्येकस्यां मालायां दश पुष्पाणि । भानुः पुष्पाणि प्रयच्छति मालायाः निर्माणं च जायते । आगच्छन्तु मित्राणि ! वयम् आहत्य कति पुष्पाणि उपयुज्य एका माला निर्मिता भवति इति अवगच्छामः ।

| | | | | | |
|---|---|---|---|---|---|
| ५० + १ = ५१ | पञ्च दशकानि  | + | एक-एककम्  | = | ५१ एकपञ्चाशत् |
| ५० + २ = ५२ | पञ्च दशकानि  | + | द्वे एकके  | = | ५२ द्विपञ्चाशत् |
| ५० + ३ = ५३ | पञ्च दशकानि  | + | त्रीणि एककानि  | = | ५३ त्रिपञ्चाशत् |
| ५० + ४ = ५४ | पञ्च दशकानि  | + | चत्वारि एककानि  | = | ५४ चतुःपञ्चाशत् |

| | | | | | |
|---|---|---|---|---|---|
| ५० + ५ = ५५ | पञ्च दशकानि  | + | पञ्च एककानि  | = | ५५ पञ्चपञ्चाशत् |
| ५० + ६ = ५६ | पञ्च दशकानि  | + | षड् एककानि  | = | ५६ षड्पञ्चाशत् |
| ५० + ७ = ५७ | पञ्च दशकानि  | + | सप्त एककानि  | = | ५७ सप्तपञ्चाशत् |
| ५० + ८ = ५८ | पञ्च दशकानि  | + | अष्ट एककानि  | = | ५८ अष्टपञ्चाशत् |
| ५० + ९ = ५९ | पञ्च दशकानि  | + | नव एककानि  | = | ५९ नवपञ्चाशत् |
| ५० + १० = ६० | पञ्च दशकानि  | + | एक दशकानि  | = | ६० षष्टिः |

## एककानां दशकानां च सङ्कलनम् -

| | | |
|---|---|---|
| ६० + १ | = | ६१ |
| ६० + २ | = | ६२ |
| ६० + ३ | = | ६३ |
| ६० + ४ | = | ६४ |
| ६० + ५ | = | ६५ |
| ६० + ६ | = | ६६ |
| ६० + ७ | = | ६७ |
| ६० + ८ | = | ६८ |
| ६० + ९ | = | ६९ |
| ६० + १० | = | ७० |

| | | |
|---|---|---|
| ७० + १ | = | ७१ |
| ७० + २ | = | ७२ |
| ७० + ३ | = | ७३ |
| ७० + ४ | = | ७४ |
| ७० + ५ | = | ७५ |
| ७० + ६ | = | ७६ |
| ७० + ७ | = | ७७ |
| ७० + ८ | = | ७८ |
| ७० + ९ | = | ७९ |
| ७० + १० | = | ८० |

| | | |
|---|---|---|
| ८० + १ | = | ८१ |
| ८० + २ | = | ८२ |
| ८० + ३ | = | ८३ |
| ८० + ४ | = | ८४ |
| ८० + ५ | = | ८५ |
| ८० + ६ | = | ८६ |
| ८० + ७ | = | ८७ |
| ८० + ८ | = | ८८ |
| ८० + ९ | = | ८९ |
| ८० + १० | = | ९० |

| | | |
|---|---|---|
| ९० + १ | = | ९१ |
| ९० + २ | = | ९२ |
| ९० + ३ | = | ९३ |
| ९० + ४ | = | ९४ |
| ९० + ५ | = | ९५ |
| ९० + ६ | = | ९६ |
| ९० + ७ | = | ९७ |
| ९० + ८ | = | ९८ |
| ९० + ९ | = | ९९ |
| ९० + १० | = | १०० |

| | | | | | |
|---|---|---|---|---|---|
| ९० + १० = १०० | नव मालाः इत्युक्ते नव दशकाः  | + | एका माला इत्युक्ते एक-दशकानि  | = | १०० शतकम् |

## ■ मम शब्दाः

## रिक्तस्थानेषु क्रमेण सङ्ख्यां लिखन्तु –

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| ११ | | १३ | १४ | | | १७ | | | २० |
| २१ | | | २४ | | | | | | |
| | | | | | ३६ | | | | |
| | | ४३ | | | | | | ४९ | |
| | ५२ | | | | ५६ | | | | |
| ६१ | | | ६४ | | | ६७ | | ६९ | |
| | | ७३ | | | | | | | ८० |
| | | | ८४ | | | | ८८ | | |
| ९१ | | ९३ | | | | ९७ | | | १०० |

■ **वदतु ₹ ६८, ₹ ७८ इति एतयोः मध्ये कतमः राशिः अधिकः अस्ति ?**

______ तः ______ अधिकः अस्ति ।

■ **सौम्या पाटलपुष्पस्य एकं पादपं ₹ ५३ रूप्यकैः क्रीतवती । शतपत्री-पुष्पस्य च एकं पादपं ₹ २८ रूप्यकैः क्रीतवती । तर्हि सौम्या आहत्य कतीनां रूप्यकाणां व्ययं कृतवती ?**

| | | |
|---|---|---|
| पाटलपुष्पस्य मूल्यम् ₹ ५३ रूप्यकाणि |  |  |
| शतपत्रीपुष्पस्य मूल्यम् ₹ २८ रूप्यकाणि |  |  |
| सौम्यायाः सम्पूर्ण-व्ययः |  |  ₹ ______ |

**शिक्षक-निर्देशः -** शिक्षकः/शिक्षिका सहभागिनः प्रेरयेत् । ते स्वयं विभिन्नसङ्ख्यानां न्यूनाधिकविषये तुलनां कुर्युः ।

■ **सौम्यायाः पार्श्वे ₹ ६० रूप्यकाणि सन्ति । सा शतपत्रीपुष्पस्य इतोऽपि एकं पादपं क्रेतुम् इच्छति । एकस्य पादपस्य स्वीकरणानन्तरं तस्याः पार्श्वे कति रूप्यकाणि अवशिष्टानि भवन्ति ?**

| | | |
|---|---|---|
| सौम्यायाः पार्श्वे ६० रूप्यकाणि सन्ति । |  |  |
| शतपत्रीपुष्पस्य मूल्यम् ₹ २८ रूप्यकाणि |  |  |
| सौम्यायाः पार्श्वे अवशिष्टानि ___ रूप्यकाणि ? |  |  |

**शिक्षक-निर्देशः -** शिक्षकः / शिक्षिका सहभागिनां कृते विभिन्नसन्दर्भद्वारा सङ्कलनस्य व्यवकलनस्य उदाहरणानि दद्यात् । तैः सह पर्यावरणरक्षणार्थम् अपि चर्चां कुर्यात् ।

## मिलित्वा पठामः

# समुद्रात् जलं कुत्र गच्छति ?

स्रोतसः, तडागात् पङ्कात् च स्रवत् जलं कुल्यादिषु प्राप्नोति। कुल्याद्वारा लघुनदीषु, लघुनदीभ्यः दीर्घनदीषु, एवम्प्रकारेण सर्वतः समायाताः नद्यः समुद्रेण सह सम्मिलिताः भवन्ति। यदा आरभ्य अयं संसारः निर्मितः आसीत् तदा आरभ्य एवम् अनुवर्तितम् अस्ति। किन्तु समुद्रात् जलं कुत्र गच्छति ? तत् जलं समुद्रतटात् किमर्थं न स्रवति ?

समुद्रात् जलं वाष्परूपं प्राप्नोति। वाष्पम् उपरि गच्छति एवं च तत् उपरि विद्यमानं वाष्पं मेघरूपं प्राप्नोति। तं मेघं वायुः सर्वत्र प्रसारयति। प्रसृतः मेघः वृष्टिरूपेण पुनः भूमौ पतति। पतितं जलं भूमिद्वारा स्रवत् पङ्के कुल्यायां च प्राप्नोति। कुल्यायाः नदीषु, नद्याः समुद्रे, समुद्रात् पुनः वाष्परूपेण उपरि गच्छति मेघरूपेण परिवर्तितं च भवति। वायुः मेघं सर्वत्र प्रसारयति।

*-लियो टॉल्स्टॉय*



## मम शब्दाः

**शिक्षक-निर्देशः -** शिक्षकः / शिक्षिका सहभागिनाम् उत्साहवर्धनं कुर्यात्, ते जलस्य विभिन्नानां स्रोतसां विषये च चर्चां कुर्युः । तडागस्य नद्याः समुद्रस्य च स्वच्छतायाः संरक्षणस्य च विषये वार्तालापं कुर्युः ।